श्रीमहात्रिपुरसुंदरीतत्त्वविद्याः

स्तवराजः

नं० १२०८

नं० ५९६८-च

श्रीमहात्रिपुरसुन्दरीतत्त्वविचाराख्यास्तवराजम् (तन्त्रम्)

पत्राणि ४ (सम्पूर्णम्)



श्रीमहात्रिपुरसुंदरीस्तत्त्वविद्याख्यास्तवराजम्

पत्राणि ४ (सम्पूर्णम्)

त्रि॰ सुं॰
स्त॰

ॐश्रीदेव्यैसदासुफलदायिन्यैनमः श्रीईश्वरउवाच अथुनाष्टाएा
देवेशिस्तोत्रंतत्त्वनिरूपणं महात्रिपुरसुंदर्याः सर्वस्वंसारमुत्तमं
यस्यकस्यनवक्तव्यंनद्रष्टव्यंकदाचन यस्यकस्यनदातव्यंविना
शिष्यायधीमते अस्यश्रीत्रिपुरसुंदरीस्तोत्रराजस्य श्रीदक्षिणामूर्तिः
ऋषिः पंक्तिश्छंदः श्रीमहात्रिपुरसुंदरीदेवता प्रथमकूटंबीजं द्वि
तीयंशक्तिः तृतीयंकीलकं श्रीधर्मार्थकाममोक्षार्थेस्तवपाठेवि
नियोगः ध्यानं सूर्यकोटिसमानाभांचतुर्बाहुंत्रिलोचनां पाशांकु
शंधनुर्बाणान्धारयंतींशिवांभजे सुभंवक्त्वारूढंमतियुतमनल्पे
ष्टफलदं सबिंदुंद्विंदुंमदोयदिजपतिभक्तस्तवमनुं तदातस्यक्षोणीब
लयममरेशार्चितपदो भवेज्जित्वैकाकीन्टपजनशिखाशेखरमणिः

शून्यं योदहनाधिरूढममलं वामाक्षिणीसंयुतं सेंदुं सुंदरि बिंदुमंडि
तशिखं स्वांते स्मरेत्साधकः मूकस्यापि सुरेंद्रसिंधुजलवद्वाग्देवताभा
रती सद्यः पद्यमयीमुखाब्जकुहराद्देवेशि निर्गच्छति २ ककारो
र्ध्वध्यांतात्तारमिपरमात्राञ्चितममुं सबिंदुं चंद्रार्धांकितममलचंद्रा
मृतमयं जपेद्यो मंत्रेशं हृदयभवने वीरजननि त्वदीयं निःशंकं
पदमवनिनाथः स लभते ३ वाग्भवं तव शिवे हृदि बीजं ध्यायते
यदि नरो चलचित्तः तस्य त्वच्चरणपूजनमात्राद्दासतां भजति मंदि
रे रमा ४ शक्तिबीजमनघं सुधाकरं साधको यदि जपेद्धृदि भक्त्या
तस्य देववनिताश्चरणाब्जौ रंजयंति मुकुटैर्मणियुक्तैः ५ तारिणी
मेकमनुमध्यसंस्थ्यं यो ध्यायते साधकचक्रवर्ती इह्नांगनाके-

त्रि·सुं·
स्त·
2

लिविलासकारीपरत्रमुक्तः शतकल्पकोटि ६ मायाबीजंयोज
पेन्नेमहेशितत्त्वंमंत्रीभक्तिमान्मुक्तिकांक्षी त्वत्सद्दृष्ट्यायातित्व
द्धामरम्यंनाकस्त्रीभिर्वीज्यमानः स्तुतालैः ७ लक्ष्मीबीजंसर्वमं
त्रैकतत्त्वंध्यायेन्मंत्रीतावकंविश्वमातः भुक्त्वाभोगान्यातित्रै
लोक्यराज्यंकृत्वास्थानंतावकंसाधकेशः ८ ककाराद्यंकूटं
भुवनविदितंतेजपतियो हृदंतर्मंदोवात्रिदशजननित्र्यक्षरपदे
त्रिनेत्रोविष्णुर्वाकमलनयनः पंकजभवो भजेद्दासांगेहेजननि
सहसातस्यविडम्बः ९ हकाराद्यंकूटंविदितमतिगुप्तंगुणपुरं
गुणातीतंत्र्यर्णाद्ध्यरचितबीजंमनुमयं जपेद्ध्यायेद्धस्तेविभव
मनिशंप्राप्यसहसा सुरस्त्रीभिः सार्धंचरतिभवनेनंदनवने १०

सकारादिकूटं चतुर्वर्णसाध्यं परं योजपेत्साधको मानसे तु शिवो
विष्णुरिंद्रो विरिंचो महेशित्वदीये ष्टपुत्रं भजेत्साधकं तं ११ शक्तयर्णाढ्यं
साधकोऽनर्जपेद्यो बीजं तेजो वर्धनं सुप्रभाते सर्वांङ्गित्वा साधको वैरि
संघान्कुर्याद्राज्यं जन्मजन्मांतरेषु १२ वासनार्णामनिशं यदि ध्या
येद्विंदुमंडितमसाध्यताकुलं वीरभूमिशयने रिपून्निजांस्तान्विसृ
ज्य भजते धरामिमां १३ कामराजमम्लैकनिधानं योजपेद्धदिनरो
भवभूत्यै सार्वभौमपरिपालितां धरां धारयेद्विसहसा तव भक्त्या १४
मायाबीजं देवि मंत्रांतरस्थं रात्रावग्निं ध्यायते साधकोयः भूमौ भू
पालस्य पादाब्जयुग्मं रंजंति स्वैर्मौलिरत्नांशुभिस्तैः १५ त्वन्मंत्रांतगतं
रमार्णमचलं पीयूषधाराधरं तत्त्वं तथ्यमतंद्रितो जपति यो बीजं श्रि

वेत्तावक्तं वश्यास्तस्यधराधरेश्वरसुतेगीर्वाणवामभ्रुवः पूज्य
श्चापिमुनीश्वरैःकविवरैःस्तुत्यःसमस्तैर्नृपैः १६ श्रीसुंदरीस्तव
वरंपठतेजपेद्योश्रीमंत्रराजनिलयंविभवैकहेतुं इष्टप्रदानसमये
बहुकल्पवृक्षंशीघ्रंप्रयातित्रिदिवंसनरोविशिष्टः १७ इतीदंपरमं
तत्त्वमंगभूतंहिपंचमं महात्रिपुरसुंदर्याःस्तवराजंस्तवोत्तमं इदंपंचां
गमनिशंसुंदर्याःसारमुत्तमं गोप्यंगुप्ततमंगुह्यंगोपनीयंप्रयत्नतः
सदागुप्तंसदागोप्यंगोप्तव्यंपशुसंकटे राज्यंदेयंशिरोदेयंनदेयाषोड
शाक्षरी गुप्तमत्यंतगुप्तंचगोपनीयंस्वयोनिवत् अभक्तेभ्योपिपुत्रे
भ्योदत्त्वानरकमाप्नुयात् विनाशिष्यायनोदद्यात्साधकाग्रेनगोपये
त् दुर्जनेभ्यःसदागोप्यंगुप्तंचशारजन्मनः सर्वदागोपयेन्नित्यमित्या

त्वापारमेश्वरी इतिश्रीमद्रुद्रयामलेतंत्रेश्रीमदुमामहेश्वरसंवादेश्री
महात्रिपुरसुंदरीतत्त्वविद्याख्यःस्तवराजःसमाप्तइतिशिवंवोभवीत्तु
तमांसाधकस्य ॥ ॥

नं० ५९९८-घ

श्री महात्रिपुरसुन्दरीतत्त्वविचाराख्यास्तवराजम् (यन्त्रम्)

पत्राणि ४ (सम्पूर्णम्)